Remarks—The first three FF. are detailed for the elucidation of ***Praśna.*** The work is composed in Maṇipravāḷa style. The last five FF. contain the Śūliniyantravidhi as seen in Ākāra Bairavakalpa.

॥ प्रश्नषट्पञ्चाशिका (सव्याख्या) ॥

No. 716. PRAŚNAṢAṬPAÑCĀŚIKĀ with commentary.

C. O. L. No. 612.

Substance—Paper. Size—11″ × 8¾″. Pages — 31. 18 lines per page and 18 letters per line. Script—Devanāgarī. No. of Granthas—310. Complete.

Owner—C. O.

Subject—Same as No. 709 A.

Beginning :

नमस्कृत्य गणेशानं वाग्देवीं सर्वखेचरान् ।
मया षट्पञ्चाशिकायाः

तत्र प्रथमं केन्द्रचतुष्कस्य संक्षेपाद् विषयभेदमाह—

च्युतिर्विलग्नाद्धिबुकाच्च वृद्धि-
मध्यात्प्रवासोऽस्तमयान्निवृत्तिः ।
वाच्यं ग्रहैः प्रश्नविलग्नकालाद्
गृहं प्रविष्टो हिबुके प्रवासी ॥

च्युतिः स्थानात्प्रच्युतिः । वृद्धिः सुखाभिवृद्धिः ।

End:

गुरौ मध्यवयः पञ्चाशदब्दः । सौरे अतीव वृद्धः सप्तत्यब्दाधिकः । जातिर्ब्राह्मणादिः । तां वक्ष्यति—

जीवसितौ विप्राणां क्षत्रस्यारो विशाञ्चन्द्रः ।
शूद्राधिपः शशिसुतः शनैश्वरः सङ्करभवानाम् ॥

इति । स्पष्टोऽर्थः ।

Colophon:

इति पारमेश्वर्यां षट्पञ्चाशिकावृत्त्यां मिश्रकाध्यायः समाप्तः ।
समाप्तश्चायं ग्रन्थः ।

Author—Parameśvara.

Remarks—This work is different from No. 654 B, though the author's name is identical.

॥ प्रश्नषट्पञ्चाशिका (सव्याख्या) ॥

No. 717. PRAŚNAṢAṬPAÑCĀŚIKĀ with commentary.

C. O. L. No. 962.

Substance—Paper. Size—11″ × 8¾″. Pages — 22,

22 lines per page and 22 letters per line. Script—Devanāgarī. No. of Granthas—350.

Owner—C. O.

Subject etc.—Same as No. 652 B.

॥ प्रश्नसारभाषा ॥

No. 718 A. PRAŚNASĀRABHĀṢĀ.

C. O. L. No. 2478 A.

Substance—Palm leaf. Size—10″ × 2″. Leaves—84. 7—9 lines per page and 32—40 letters per line. Script—Malayāḷam. No. of Granthas—1500.

Owner—Valia Rāja of Iḍappaḷḷi.

Subject—Same as No. 709 A.

Beginning :

हरिः । श्रीगणपतये नमः । अविघ्नमस्तु ।

സ്കന്ദനഗ്രജനജസ്രമാദരാലിന്ദുശേഖരസുതൻ ഗജാനനൻ
മാമകേ മനസി (പൃക) സാമ്പ്രതം സുന്ദരൻ സകലരാലുമീഡിതൻ
വാണിമാതുമിഹ വന്നു പുക്ക മേ വായിൽ നാവിലിത പദ്യഭാഷയാ
പ്രശ്നസാരമുപദേശമിന്നു ഞാൻ ചൊല്ലുതിന്നു സുഖമേ
സുനിശ്ചിതം

മാധവീയമിഹ [illegible] രചിതം മനോഹരം
മന്നിലില്ലയിതു പദ്യഭാഷയായ് മുന്നിലെന്നുമറിയേണമേവരും

End :

वृषवाहनवाण्याप्तिर्मित्राप्तिश्च वणिक्स्थिते ।
वृषभध्वजसिंहानां संस्पर्शनफलं क्रमात् ॥

गजभूषाबन्धुपुत्रलाभाद् द्विरदसंस्थिते ।
दन्तिध्वजमृगेन्द्रोक्षसंस्पर्शनफलं विदुः ॥
वणि... ... ...

Colophon :

इति नष्टजातकं षष्ठम् ।

Remarks—The Ms. deals with the details connected with Cāndramāsa etc. The work is devoted to the elucidation of Naṣṭaprakaraṇam.

॥ वृत्तरत्नावली ॥

No. 718 B. VṚTTARATNĀVALĪ.

C. O. L. No. 2478 B.

Substance—Palm leaf. Size—14″ × 2″. Leaves—5. 9 lines per page and 36 letters per line. Script—Malayāḷam. No. of Granthas — 125.

Owner—Same as No. 718 A.

Subject—Description of different metres.

Beginning:

हरिः ।

मा भूत् सङ्गो जननि! जनैस्सै-
र्मत्ता येषां मतिरिह वित्तैः ।
भाग्योदारैर्भवतु विहारो
भक्तैः[illegible] [illegible] [illegible] मे ॥

भ्रूमसमर्चानातनुपे त्वं
देवि निकृष्टानप्यतिभक्त्या ।
भावयतस्ते मूर्तिमुदारां
चम्पकमालानिन्दकबाहाम् ॥

भाति नगाङ्गप्रतिनिधिशोभे
हारझरी ते जननि कुचाग्रे ।
श्रीर्वदनेन्दोर्हसति सरोजं
कान्तिमुपेता सततविकासात् ॥

End :

कराम्बुजसृजत् समाक्षवलया (?)
तनुस्तव शुभे जितेन्दुसुषमा ।
छिनत्तु दुरितच्छटां मम नदी
तटीमिव चलज्जलोद्धतगतिः ॥

मनो व्रजसि जासयल्लगनमंहसां मे यदि
त्वमङ्गमतिचन्द्रिकं वियुतमोहमाबिभ्रती ।
तदा परिणतिं गता द्रुहिणपत्नि पृथ्वीसतां
प्रभावमतिवर्तते मम हि भाग्यसम्पत्सदा ॥

युगान्तजांभसि जगतीं निमज्जतीं
यथोद्धरेत्सकुतुकमादिसूकरः ।
त्वमुद्धराधिकरुचिराकृतिस्तथा
भवाम्बुधौ महति निमग्नमम्ब माम् ।

Colophon :

इति श्रीवृत्तरत्नावली समाप्ता ।

गुरूणां चरणाम्भोजपरागपरमाणवः ।
मनोमुकुरमस्माकं पुनीयुरनुवासरम् ॥

Author—Ilattūr Rāmasvāmy Śāstrial.

Remarks—The work serves at once as a panegyric of Devī and as an exemplification of all metres. The last two leaves of the codex contain some portions relating to prognostication of diseases.



॥ विवाहप्रश्नादि ॥

No. 718 C. VIVĀHAPRAŚNĀDI.

C. O. L. No. 2478 C.

Substance—Palm leaf. Size—10″ × 2″. Leaves—8. 8 lines per page and 34 letters per line. Script—Malayāḷam. No. of Granthas—150.

Owner—Same as No. 718 A.

Subject—Prognostication regarding marriage etc.

Beginning :

हरिः । अथ विवाहप्रश्नः ।

दक्षिणबाहुशिरोरःस्पर्शः शुभकृद्विवाहस्य ।
वामकरपृष्ठजानुस्पर्शस्त्वशुभस्तथा तस्य ॥

दक्षभागोदरशिरोयोनिस्पर्शो विवाहकृत् ।
वामबाह्वङ्घ्रिहस्तानां स्पर्शं उद्वाहविघ्नकृत् ॥

विळम्बनकरो जानुपादस्पर्शो विवाहने ।
पृष्ठ....कटिस्पर्शो विनिन्दितः ॥

जीवोदये शुक्रबुधोदये वा
केन्द्रत्रिकोणायगतेषु वापि ।
प्रश्नो यदि स्याद् बहुपुत्रपौत्रान्
दृष्ट्वा लभन्ते महतीं श्रियञ्च ॥

End :

प्रोषितागमनप्रश्ने षष्ठे चन्द्रोऽष्टमेऽपि वा ।
चन्द्राष्टमस्थिते पापे चरलग्ने विशेषतः ॥

जामित्रे वापि षष्ठे वा ग्रहः केन्द्रे च प्राक्...
... .

Colophon :

Author :

Remarks—The Ms. is in neat, legible hand.

॥ प्रश्नज्ञानम् ॥

No. 718 D. PRAŚNAJÑĀNAM.

C. O. L. No. 2478 D.

Substance—Palm leaf. Size—10″ × 2″. Leaves—15. 8 lines per page and 32 letters per line. Script—Malayāḷam. No. of Granthas — 250.

Owner—Same as No. 718 A.

Subject etc.—Same as No. 893, DCSMMPL.

॥ जातकपद्धतिव्याख्या (बालप्रबोधिनी) ॥

No. 718 E. JĀTAKAPADDHATIVYĀKHYĀ.

Bālaprabodhinī.

C. O. L. No. 2478 E.

Substance—Palm leaf. Size—10″ × 2″. Leaves—30. 8 lines per page and 35 letters per line. Script—Malayāḷam. No. of Granthas—400.

Owner—Same as No. 718 A.

Subject etc.—Same as No. 681 B.

॥ प्रश्नानुष्ठानम् ॥

No. 719 A. PRAŚNĀNUṢṬHĀNAM.

C. O. L. No. 2066 A.

Substance—Palm leaf. Size—9½″ × 2″. Leaves—36. 8—12 lines per page and 30 letters per line. Script—Malayāḷam. No. of Granthas — 720. Complete.

Owner—Nārāyaṇan Nārāyaṇan Mūttatu, Veccūr.

Subject etc.—Same as No. 899, DCSMMPL.

Remarks—The Ms. is much antiquated and damaged. The following line occurs after the colophon:

“इति कृष्णेन लिखितं पुस्तकमिदं परिसमाप्तम्”

॥ मुहूर्तपदवी ॥

No. 719 B. MUHŪRTAPADAVĪ.

C. O. L. No. 2066 B.

Substance—Palm leaf. Size—9½" × 2". Leaves—6. 7—8 lines per page and 22 letters per line. Script—Malayāḷam. No. of Granthas—65. Incomplete.

Owner—Same as No. 719 A.

Remarks—The work is printed as No. 5 in SVSLS.

॥ होराशास्त्रम् ॥

No. 719 C. HORĀŚĀSTRAM.

C. O. L. No. 2066 C.

Substance—Palm leaf. Size—9½" × 2". Leaves—40. 11 lines per page and 32 letters per line. Script—Malayāḷam. No. of Granthas—880. Complete.

Owner—Same as No. 719 A.

Remarks—This Ms. is published with its commentary, Vivaraṇa, as No. 81 in TSS. But the text alone is embodied herein. In its wake one more Fol. is seen dealing with the auspicious time for certain religious functions.

॥ प्रश्नानुष्ठानपद्धतिः ॥

No. 720. PRAŚNĀNUṢṬHĀNAPADDHATI.

C. O. L. No. 36.

Substance—Paper. Size — 11″ × 9″. Pages — 98. 20 lines per page and 12 letters per line. Script—Malayāḷam. No. of Granthas — 725.

Owner—C. O.

Subject etc.—Same as No. 399, DCSMMPL.

॥ प्रश्नायनव्याख्या ॥

No. 721. PRAŚNĀYANAVYĀKHYĀ.

C. O. L. No. 955.

Substance — Paper. Size—11″ × $8\frac{3}{4}$″. Pages — 73. 20 lines per page and 28 letters per line. Script—Devanāgarī. No. of Granthas—1250.

Owner—C. O.

Subject—Same as No. 708 A.

Beginning:

अथ प्रश्नायनव्याख्या लिख्यते । भास्करमिति । भास्करं तन्नामधेयं गुरुम् । एवमन्यत्र । अपिच भास्करं ग्रहाधिपं शङ्करं सर्वविद्याप्रवर्तकं, वह्निं वाचोऽधिदैवमग्निं, नारायणं साक्षाद्विष्णुं च इति । गण्डान्तेति । अर्गलः एकार्गलः अन्नानिष्टर्क्षं बालाभवर्जिततारं तिथिः स्थिरार्धं स्थिरकरणम् इति । निम्नोच्चेति । शून्यौकः शून्यग्रहं जलादेरन्तिकम् इति । निरन्तरेणेति—

End:

स्त्रीणामिति । स्त्रीजातके लग्नादिषु बलवतः पञ्चमे स्थितैरक्षैः समाः पुत्र्यः नवमे पुत्राः । पुंसां पञ्चमे सुताः पु(त्रः?त्राः) नवमे सुताः पुत्र्यः इति । पञ्चदशायनम् ।

Colophon:

मध्यारण्यद्विजास्याद्विगलित इह यः प्रश्नमार्गोऽमरादौ
कोलम्बे छात्रशिष्योऽस्य च विरचितवान् जातकादेशरत्नम् ।
तच्छिष्यस्यानुमत्या स्थलिपुरनिलयस्यायनप्रश्नतोऽसौ
सिप्रादेशाधिवासी व्यरचयमहमप्युत्तमः पूरुषाणाम् ॥

Author—Puruṣottama.

Remarks—The colophon discloses that the commentator belonged to 'सिप्रादेश' and that the commentary was written at the instance of the disciple of the author of the Jātakādeśaratna who belonged to Sthālīpura.

॥ फलदीपिका ॥

No. 722 A. PHALADĪPIKĀ.

C. O. L. No. 2007 A.

Substance—Palm leaf. Size—15¼″ × 1½″. Leaves—18. 7—9 lines per page and 40 letters per line. Script—Grantha. No. of Granthas—360. Incomplete.

Owner—Śakti Śāstrī, Ayikkudi.

Subject—Beginning : Same as No. 901, DCSMMPL.

End :

लाभेऽर्थसञ्चयमनेकगुणं सुभोगं
यद्यद् गृहोपकरणं सकलार्थसिद्धिम्।
प्रच्छन्नपापमयमव्ययमर्थनाशं
रि:फे विरुद्धम(ग?ति)मक्षिरुजश्च पापः ॥

भावस्यांशकसंस्था भावफलं पूर्णमेव कथयन्ति ।
न्यूनाधिकांशवशतः फलवृद्धिह्रासताच्युतिम् ॥

Colophon :

इति मन्त्रेश्वरविरचितायां फलदीपिकायां ग्रहागतभावफलं नामाष्टमोऽध्यायः ।

Author—Mantr śvara.

Remarks—This Ms. embodies the first two chapters and four verses in the third and the 8th. Most of the leaves are da aged.

॥ जातकचन्द्रिका ॥

No. 722 B. JATAKACANDRIKA.

C. O. L. No. 2007 B.

Substance—Palm leaf. Size—$15\frac{1}{4}'' \times 1\frac{1}{2}''$. Leaves—12. 7 lines per page and 38 letters per line. Script — Grantha. No. of Granthas — 200. Complete.

Owner—Same as No. 722 A.

Subject—Same as No. 689 A.

Beginning :

हरिः । ओम् । शुभमस्तु ।

सिद्धान्तमौपनिषदं शुद्धान्तं परमेष्ठिनः ।
शोणाधरमहं किञ्चिद् वीणाधरमुपास्महे ॥

फलानि नक्षत्रदशाप्रकारेण विवृण्म(हे) ।
वयं पराशरीं होरामनुसृत्य यथामति ॥

बुधैर्भावादयस्सर्वे ज्ञेयाः सामान्यशास्त्रतः ।
एतच्छास्त्रानुसारेण संज्ञां ब्रूमो विशेषतः ॥

बुधैरिति । भावादयः लग्नादिद्वादशभावाः । आदिशब्देन दशा-भुक्तिविभागकेन्द्रत्रिकोणादिलक्षणा उच्यन्ते । सामान्यशास्त्रतः तदुक्तप्रकारेण ज्ञेया । वयमेतच्छास्त्रानुरूपेण वक्ष्यमाणशास्त्रानुगुण्येन विशेषतः विशेषसंज्ञां ब्रूमः ।

End :

पापिनश्च ग्रहास्तेषामुच्चत्वे सति किं फलम् ।
बलवत्त्वे पातकानां फलं लभ्येत कर्हिचित् ॥

पापिन इति। ग्रहाः रव्यादयः पापिनो भवन्ति चेत् तेषामुच्चत्वे सति यत्फलमस्ति तत्फलं लभते नरः नाशुभम् । शुभानामेव ग्रहाणामुच्चता स्वक्षेत्रादिगुणः नीचता शत्रुक्षेत्रादिदोषाश्च बलवत्त्वदौर्बल्य(त्व?) हेतुरिति भावः ।

Colophon :

हरिः । ओम् । जातकचन्द्रिका समाप्ता । गुरुभ्यो नमः ।
सुब्रह्मण्यो रक्षतु ।

Author :

Remarks—Same as No. 607 A.

॥ भावनिघण्टुः ॥

No. 722 C. BHĀVANIGHAṆṬU.

C. O. L. No. 2007 C.

Substance—Palm leaf. Size—$15\frac{1}{4}'' \times 1\frac{1}{2}''$. Leaves—5. 7—8 lines per page and 40 letters per line. Script—Grantha. No. of Granthas—100.

Owner—Same as No. 722 A.

Subject—A collection of the synonyms of the twelve Bhāvas.

Beginning :

भवत्यश्विनिनक्षत्रमश्विदस्रतुरङ्गमम् ।
आद्यं तुरङ्गं तुरगमश्वं वाजिहयं हरिः ॥

अश्वयुक् चाद्यभं चैव अश्विनीवाचिका इमे ।
അപഭരണിയിന്

यमान्तको यमश्चैव भरणी यमदेवता ।
भरणी स्याद्यमं याम्यं गेयं दुर्गं भयं तथा ॥

End :

पुष्टिः कीर्तिः प्रवासश्च आज्ञामानप्रवृत्ति च ।
सर्वलाभं ज्येष्ठपादवामकर्णार्थिलाभयुक् ॥

वामाक्षिशयनस्थानवैकल्यपद्युग्व्ययः ।
पितुर्मारणहानिश्च नरकं निर्गमं तथा ॥

Colophon :

भावनिघण्टुः समाप्तः ।

Author :

Remarks—Same as No. 607 A.

॥ प्रश्नसारः ॥

No. 722 D. PRASNASĀRA.

C. O. L. No. 2007 D.

Substance—Palm leaf. Size—$15\frac{1}{4}'' \times 1\frac{1}{2}''$. Leaves—97. 7—9 lines per page and 50—64 letters per line. Script—Grantha. No. of Granthas—2700. Incomplete.

Owner—Same as No. 722 A.

Subject—Same as No. 708 A.

Beginning :

हरिः । ओम् । अविघ्नमस्तु ।

नमस्कृत्य गजास्यं च भूतनाथं गुरून् ग्रहान् ।
वैद्यनाथस्य शिष्येण प्रश्नसारो विरच्यते ॥

तन्वादीनां तु भावानां ग्रहाणां च तथा पु(नः) ।
... ...मेण लिख्यन्ते काश्चित् संक्षेपतो मया ॥

होरात्मा तनुरङ्गभं ह्यथ शिरः [illegible] च मूर्ति [illegible]
जिह्वावाङ्मुखभं सुसत्यवचनं सत्यं च [illegible] ।

विद्या... ....न्तिरपरं वित्तं कुटुम्बं तथा
नासा काव्यपुराणशास्त्रमपि च स्थानं द्वितीयं स्मृतम् ॥

End:

जायते तु स्त्रियः काले कुम्भांशो मकरांशकः ।
वृषे तु सात्त्विके काले कुजे जाते गुरां(?)शकः ॥

अथवा कटकांशः स्याच्चन्द्राङ्कणगतो यदि ॥
वृषे बुधे स्वाङ्कणस्थे सात्त्विके रविरंशकः ॥

तामसे वृषभांशः स्याद्रजः कन्यांशसंभवः ।
वृषे गुरौ रजःकाले सिंहांशे जायते नरः ॥

अथवा शनिरंशस्स्याच्छुक्रसूर्याङ्कणे यदि ।

Colophon:

भूतनाथपुरवासिना सोमयाजिना कृते प्रश्नसाराख्ये योगार्णवो नाम चतुर्दशोऽध्यायः ।

Author—Somayāji, a native of Bhūtanāthapura.

Remarks—21 leaves seen after the completion of the Praśnasāra deal with several other topics. Bhūtanāthapura may probably be identified with Bhūtapāṇḍy, a place in South Travancore.

॥ फलनिर्णयः (केरलभाषाव्याख्योपेतः) ॥

No. 723. PHALANIRṆAYA
with Malayāḷam commentary.

C. O. L. No. 245.

Substance—Paper. Size—13″ × 8½″. Pages—105.

20 lines per page and 18 letters per line. Script—Malayāḷam. No. of Granthas—1050. Incomplete.

Owner—C. O.

Subject—Description of the astrological effects based on Tithi, Vāra, etc.

Beginning:

വാരാദിഫലനിർണ്ണയഃ. ഞായറാഴ്ചഫലമാവതു

आत्मज्ञानी सदा शूरः पैत्तिकः प्रियवल्लभः ।
चतुरश्रतनुः श्रीमान् रविवारे प्रसूयते ॥

എന്നതു. ആത്മജ്ഞാനിയായും സദാ ശൂരനായും ഉൾക്കൊള്ളപ്പെട്ട ബുദ്ധിയായും പ്രിയവാദിയായും വല്ലഭനായും ചതുരശ്രതനുവായും ശ്രീമാനായും ഫലം.

End:

नरो रोगं महाप्रीतिर्देवकार्यं सुखासनम् ।
नेत्ररोगं सुखं कर्म नारीक्रिडा महाज्वरः ॥

स्वर्णभूषण...नाश्च विषभुक्तिश्च मैथुनम् ।
कुक्षिरोगं जलक्रीडा हासनं चित्रलेपनम् ॥

क्रोधनं नृत्तकार्यं च घृतभुक्ति सुनिद्रतः? ।
गन्धर्वदन्तशूलश्च कलत्रं चैव गच्छति? ॥

Colophon:

Author;

Remarks—The work contains a Malayāḷam commentary as well. It deals with the planetary effects on persons born in each day of the week.

॥ बाधापरिहारोपायः ॥

No. 724. BĀDHAPARIHĀROPĀYA.

C. O. L. No. 176.

Substance—Paper. Size—11" × $8\frac{1}{2}$". Pages—41. 16 lines per page and 20 letters per line. Script—Malayāḷam. No. of Granthas—500.

Owner—C. O.

Subject—Same as No. 657 D.

Beginning:

देवैर्वा यामदेवैः फणिगुरुपितृभिर्ब्राह्मणैः प्रेतभूतैः
पीडा या स्यात् कृता सा तदनु भवति या दृग्भवा वाग्भवा वा ।
या स्याद् भूपो विषोत्था पुनरिह रिपुभिर्या कृता सा च तासां
हेतुश्चापि क्रमेण प्रतिविधिरपि च प्रोच्यते पृच्छकानाम् ॥

देवानुकूल्यं प्रतिकूलतां च
विचार्य सत्यां प्रतिकूलतायाम् ।
तदानुकूल्याय विधिर्विधेयो
यतस्ततः सम्प्रति कथ्यते तत् ॥

End:

ज्ञानी स देवगुरुसम्मतधर्मशीलः
शास्त्री दिनेशगुरुशुक्रशनीन्दुपुत्रैः ।

साधुः सुखी बहुधनः प्रबलश्च विद्वा-
निन्दुज्ञदेवगुरुदानवपूजितारैः ॥

पञ्चग्रहैरेकगृहोपयातै-
श्चन्द्रज्ञजीवासुरवन्द्यमन्दैः ।
सर्वत्र पूज्यो विकलेक्षणश्च
महीपतुल्यः सचिवोऽथवा स्यात् ॥

अथ षड्ग्रहयोगाः ।

Colophon :

Author :

Remarks — The evil effects consequent on the absence of auspicious planets in proper places are dwelt upon herein at length.

॥ बृहत्संहिता ॥

No. 725. BṚHATSAMHITĀ.

C. O. L. No. 2346.

Substance—Palm leaf. Size—19″ × 2″. Leaves—54. 10 lines per page and 74 letters per line. Script—Malayāḷam. No. of Granthas—2500. Incomplete.

Owner — Damodaran Nampūri, Caṅgarappaḷḷy Matom.

Subject—Description of the planetary movements,

Beginning :

हरिः । श्रीगणपतये नमः । अविघ्नमस्तु ।

जयति जगतः प्रसूतिर्विश्वात्मा सहजभूषणं जगताम् ।
द्रुतकनकसदृशदशशतमयूखमालार्चितः सविता ॥

प्रथममुनिकथितमवितथमवलोक्य ग्रन्थविस्तरस्यार्थम् ।
नातिलघुविपुलरचनाभिरुद्यतः स्पष्टमभिधातुम् ॥

End :

अग्निः प्रकृत्या चपलोऽतितीक्ष्ण-
श्चण्डः क्षुधालुर्बहुभोजनश्च ।
वायुः स्वभावेन चलः कृशश्च
क्षिप्रं च कोपस्य वशं प्रयाति ॥

खप्रकृतिर्निपुणो विवृतास्यः
शब्दगतौ कुशलः सुषिराङ्गः ।
त्यागयुतो मृदुकोपस्नेह-
युतो न चिरायुः सुरसत्त्वः ॥

मनुष्यसत्त्वसंयुतो
गीतभूषणैः प्रियः ।
संविभागशीलवान्
नित्यमेव मानवः ॥

Colophon :

छागलक्षणः । षष्टिरध्यायः ।

Author—Varāhamihirācārya.

Remarks—This Ms. is available in print but many differences in reading are noticed herein.

॥ बृहत्संहिताव्याख्याव्याख्या ॥

No. 726. BṚHATSAMHITĀVYĀKHYĀVYĀKHYĀ.

C. O. L. No. 187.

Substance—Paper. Size—13" 8½". Pages—495. 18 lines per page and 16—22 letters per line. Script—Devanāgarī. No. of Granthas—5000. Complete.

Owner—C. O.

Beginning:

जयति जगतां निदानं
श्रीनिलयः स्वानुभूतिसुखसिन्धुः ।
श्रीनिरूपमबोधाख्यो
महाविभूतिर्महाविष्णुः ॥

श्रीशारदागणपतिक्षितिचन्द्रचान्द्रि-
काव्यप्रभाकरकुजाङ्गिरसार्किभानि ।
सङ्कर्षणद्रुहिणगर्गमुखान्मुनीन्द्रान्
वन्दे वराहमिहिरं गुरुमुत्पलं च ॥

पार्षगण्यकुलराममनन्दन-
श्रीकुमारतनयेन योगिना ।
श्रीवराहमिहिरोक्तसंहिता-
व्यक्रियोत्पलकृता समर्थ्यते ॥

अथोपान्त्यकालाचार्यः वराहमिहिरः शाखास्कन्धमारभमाण-स्तदादौ शिष्याचारसिद्धं प्रारब्धाविघ्नपरिसमाप्तिप्रचयगमनफलकं स्वशास्त्रं प्रतिपाद्याभीष्टदेवता(न)त्यात्मकं परब्रह्मविषयं वाङ्मनःकायनिर्मितं प्रणामरूपं मङ्गलाचरणं वाक्येन निबध्नाति शिष्यशिक्षायै—

जयति जगतः प्रसूतिर्विश्वात्मा सहजभूषणं नभसः ।
द्रुतकनकसदृशदशशतमयूखमालाचितः सविता ॥

End :

नत्राध्वरे च गृहातिथ्यं सानुकम्पम् । अयुतलक्षकोटिहोमा ग्रहमन्त्रनिरपेक्षलक्षकोटिहोमौ सानुकम्पौ च मयूरचक्रके वक्रातिचारराशिविशेषचारित्रादिग्रहयोगफलानि ।

इति व्याख्यन्निरुपमबोधाशिष्यः कुमारजः ।
योगी वराहमिहिरसंहिताबहिश्चित्रकम् ॥

Colophon :

इत्युत्पलपरिमले सप्तचत्वारिंशोऽध्यायः ।
इति पूर्वं समाप्तम् ।
समाप्तोऽयं ग्रन्थः ।

Author—Text : Bhaṭṭotpala.
Com : Kumārasutayogi.

Remarks—The work is also known as Utpalaparimaḷa.

॥ भार्गवसूत्रम् ॥

No. 727. BHĀRGAVASŪTRAM.

C. O. L. No. 115.

Substance—Paper. Size—13″ × 8″. Pages — 40.
18 lines per page and 22 letters per line.
Script—Devanāgari. No. of Granthas—500.

Owner—C. O.

Subject—Astrological prognostication.

Beginning :

दृक्प्रकारेण जातकं स्फुटीकृत्य गुरुं गणपतिं नवग्रहांश्च संपूज्य वपुःशोधनादिशुद्धो दैवज्ञो जातकावलोकनपूर्वकं फलं कथयेत् । तत्प्रकारः कथम् । पूर्वमायुः लग्नलग्नाधिपकारकरवीणां शनेश्च बलं गुरुशुक्रबुधपूर्णचन्द्रवीक्षाशुभवर्गावस्थां विचार्य योगादींश्च सम्यग्विचार्य दुर्दशां दशासन्धिं च परिहृत्यायुः प्रवदेत् । एवमेव द्वादशभावफलं विचिन्त्यम् ॥

End :

एकादशे अर्थसञ्चयवान् अनेकवश्यवाहनवान् गृहविस्तारवान् पापयुते दृष्टे पापर्क्षे वाहनहीनः क्षेत्रमन्त्रहीनः शुभयुते गृहोपकरणसमृद्धः । द्वादशे प्रच्छन्नपापः अर्थविक्षयाद्दर्थनाशः विरुद्धगतिः नेत्ररोगी...पसमांशकसंस्थाः (?) । भावफलं पूर्णमेव ।

Colophon :

इति भार्गवसूत्रं समाप्तम् ।

Author :

Remarks—The work contains 8 pādas. Its title indicates that it is written by Bhārgava.

॥ महाभास्करीयम् ॥

No. 728. MAHĀBHĀSKARĪYAM.

C. O. L. No. 25.

Substance—Paper. Size—13½" × 8½". Pages—45. 20 lines per page and 16 letters per line. Script—Devanāgarī. No. of Granthas—450.

Owner—C. O.

Subject etc.—Same as No. 902, DCSMMPL.

Remarks—After the colophon occurs the following portion:

सूर्यादिनवग्रहेभ्यो नमः ।

नमः शिवाय । हरिः श्रीः हरिः ।

नखमुखविलिखितदितितनयोपरिपतदसृगरुणीकृतगात्रः ।
हिमधरगिरिरिव नैरुक्तो नरहरिरहरहरस युष्मान् (?) ॥

अनूना तत्समा नारी साध्वी सर्वप्रियानना ।
अम्बरपरिधिः....शरशून्यनवादयः ॥

दिवसभोजनानि ।

खन्योमेष्वष्टरामाद्रिदस्राश्वाश्विनिशाकरा ।
योजनशेषः ज्ञानी माम्मभी कस्यापवर्तित(?) ॥

शेषः वेदाश्विपर्वतेन्दवः । रन्ध्रैकशून्यवेदेन्दवश्च । दृढौ रसा-
ङ्गरसमुनिवस्वष्टयमाः ।

रविकक्ष्या भूतवेदौ । शेषापवर्तितदृढौ ।

॥ महाभास्करीयम् ॥

No. 729 A. MAHĀBHĀSKARĪYA.

C. O. L. No. 2121 A.

Substance—Palm leaf. Size—14″ × 2″. Leaves—16. 11—12 lines per page and 48 letters per line. Script—Malayāḷam. No. of Granthas — 500.

Owner—S. Vāsudevan Mūs, Maṅgalappaḷḷi Illam, Āranmuḷa.

Subject etc.—Same as No. 902, DCSMMPL.

॥ महाभास्करीयव्याख्या (प्रयोगरचना) ॥

No. 729 B. MAHĀBHĀSKARĪYAVYĀKHYĀ (Prayogaracanā.)

C. O. L. No. 2121

Substance—Palm leaf. Size—14″ × 2″. Leaves—46. 12 lines per page and 48 letters per line. Script—Malayāḷam. No. of Granthas—1650.

Owner—Same as No. 729 A

Subject etc.—Same as No. 635

Remarks—Same as No. 607 A

॥ आर्यभटीयव्याख्यानम् ॥

No. 729 C. ĀRYABHAṬĪYAVYĀKHYĀNAM.

C. O. L. No. 2121 C.

Substance—Palm leaf. Size—14″ × 2″. Leaves—8. 12 lines per page and 48 letters per line. Script—Malayāḷam. No. of Granthas—288.

Owner—Same as No. 729 A

Subject—Beginning: Same as No. 637 B.

End:

एतद्भपञ्जरे गोले यो जानाति भपञ्जरमध्ये भूस्तिष्ठति ग्रहाश्च ज्योतिश्चक्रे प्रत्यग् भ्रमन्ति प्राङ्मुखाः सञ्चरन्तीति कालक्रियागोलौ यो जानातीत्यर्थः । स भगणपरिभ्रमणं हित्वा ग्रहाणां नक्षत्रगणस्य च सञ्चरणमार्गं भित्त्वा परं ब्रह्म याति आदित्यमण्डलं भित्त्वा परमं व्योम यातीत्यर्थः । अत्र कालक्रियागोलयोः परिकरत्वेन पृथक् फलाभावाल्लौकिकत्वाच्च गणितानुपादानम् इति ।

Colophon:

गीतिप्रकाशो रचितः सूर्यदेवेन सूरिणा ।
अनेन गीतिसूत्राणामर्थान् पश्यन्ति पण्डिताः ॥

इति गीतिप्रकाशः समाप्तः ।

Author—Sūryadeva Yajva.

Remarks—This is a commentary on the first of the four pādas of Āryabhaṭīya called Gītipāda.

॥ आर्यभटीयव्याख्यानम् ॥

No. 729 D. ĀRYABHAṬĪYAVYĀKHYĀNAM.

C. O. L. No. 2121 D.

Substance—Palm leaf. Size—14″ × 2″. Leaves—45. 12 lines per page and 48 letters per line. Script—Malayāḷam. No. of Granthas—1620.

Owner—Same as No. 729 A.

Subject—Same as No. 637 B.

Beginning :

एवं दशगीतिसूत्रात्मकेन प्रबन्धेनातीन्द्रियमर्थजातमुपदिश्येदानीं तन्मूलन्यायावसेयमर्थजातं प्रबन्धान्तरेण प्रदर्शयिष्यन् इष्टदेवतानमस्कारपूर्वं तदभिधानं प्रतिजानाति—

ब्रह्मकुशशिबुधभृगुरवि-
कुजगुरुकोणभगणान् नमस्कृत्य ।
आर्यभटस्त्विह निगदति
कुसुमपुरेऽभ्यर्चितं ज्ञानम् ॥

ब्रह्म ब्रह्मा स्वयम्भूः । कुः पृथिवी । कोणः शनिः । भगणो नक्षत्रगणः । ब्रह्मा शास्त्रस्य कर्तोपदेष्टा च । क्वादय उपर्युपर्यवस्थिताः शास्त्रप्रतिपाद्याः । अतो ब्रह्मणस्तेषां च नमस्कारः कृतः ।

End :

अत्र गणितपादे त्रयस्त्रिंशत्सूत्राणि, कालक्रियापादे पञ्चविंशतिः, गोलपादे पञ्चाशत्। एवमष्टोत्तरशतमस्मिन् प्रबन्धे। पूर्वस्मिन प्रबन्धे त्रयोदश। एवं सूत्राण्येकविंशत्युत्तरं शतमतीन्द्रियार्थदर्शिनाचार्येण प्रणीतम्। एतानि दिङ्मात्रेण मया व्याख्यातानि। एतेषामेकैकस्य सूत्रस्य ग्रन्थसहस्रेणापि निरवशेषार्थप्रतिपादनं कर्तुं केन शक्यते।

Colophon :

पञ्चाशं सूत्रम् एवं गोलपादोऽप्युद्देशतो व्याख्यातः।

Author :

Remarks—Same as No. 697 A.

॥ लघुमानसकरणं (सव्याख्यम्) ॥

No. 729 E. LAGHUMĀNASAKARAṆAM with commentary.

C. O. L. No. 2121 E.

Substance—Palm leaf. Size—14″ × 2″. Leaves—25. 11 lines per page and 42 letters per line. Script—Malayāḷam. No. of Granthas — 720-

Owner—Same as No. 729 A.

Subject—Principles governing astrological calculation.

Beginning :

हरिः। श्रीगणपतये नमः। सूर्यादिसर्वग्रहेभ्यो नमः।

यमालम्ब्य मनो नित्यं विषयेषु प्रवर्तते
निवर्तते नमस्तस्मै हरये विश्वसाक्षिणे ।

अथेदानीं लघुमानप्रकरणस्य विवरणं यथासामर्थ्यमस्माभिः क्रियते । तस्य गुरुतरप्रायुर्यादल्पग्रन्थत्वादनेकदेशकालपदार्थविषयत्वात्तन्त्रयुक्तिन्यायनिबन्धनत्वादपि पदपदार्थविवरणमवेक्षिततरं प्रशस्ततरेण। द्विविधविषयोदाहरणप्रदर्शनमुखेन प्रयोगविशेषाः प्रदर्शिताः न तु पदपदार्थविशेषाः तत्र क.श्मीरविषयवासी मुञ्जालाचार्यवर्यो लघुमानसकरणं चिकीर्षुरभीष्टदेवतामादित्यपदेन प्रस्तुत्यात्मनो देशजातिगुणगोत्रप्रदर्शनपूर्वकं प्रारिप्सितप्रकरणप्रयोजनमुखेन तत्करणप्रतिज्ञां कुर्वन्निन.मि(?) प्रदर्शयितुमाह—

प्रकाशादित्यवत् ख्यातो भरद्वाजो द्विजोत्तमः ।
लघ्वपूर्वस्फुटोपायं वक्ष्येऽन्यल्लघुमानमम् ॥

End :

तदुभयमाचार्येणाभ्युपगतमधिकृत्य चराचरनिरूपणपूर्वकं नाडिकाप्रमाणपरिच्छेदपर्यन्तं स्वरूपविज्ञानमस्माभिरिह चतुर्भिः श्लोकैरुपदिश्यते—

ओजे पदे शशाङ्कस्य परं रविचरं महत् ।
स्वल्पं क्रमात् क्रान्तिदोषो भूतभव्यस्समेऽन्यथा ।
स्वर्णसाम्ये तच्चरयोर्वैषम्ये युतिरन्तरम् ॥

वैधृत्यामन्यथा पाते स्वेष्टनाड्यस्तथा परम् ।
द्वावेतौ भूतभव्यसमानौ तारवच्चेदन्तरेणान्यथायुज(?) ।
विभज्यदिष्टनाडीभिमाद्यभाव्यते (?) ।
तदेतदसकृत्साध्यो निश्चलापलभाविका ॥

पूर्वराशिहृता मध्याच्छोध्यादेया तदाद्यन्ताविति प्रदर्शितोऽभिप्रायार्थः ।

Colophon :

Author—Text : Muñjalācarya.
Com:—Sūryadevayajvā.

Remarks—Same as No. 655 C.

॥ पाटीगणितसारः ॥

No. 729 F. PĀṬĪGAṆITASĀRA.

C. O. L. No. 2121 F.

Substance—Palm leaf. Size—14" × 2". Leaves—14. 12 lines per page and 48 letters per line. Script—Malayāḷam. No. of Granthas—504.

Owner—Same as No. 729 A.

Subject etc.—Same as No. 635 J.

॥ सूर्यसिद्धान्तव्याख्या ॥

No. 729 G. SŪRYASIDDHĀNTAVYĀKHYĀ.

C. O. L. No. 2121 G.

Substance—Palm leaf. Size—14" × 2". Leaves—7. 12 lines per page and 48 letters per line. Script—Malayāḷam. No. of Granthas—252. Incomplete.

Owner —Same as No. 729 A.

Subject—Description of planetary movements.

Beginning:

हरिः । श्रीगणपतये नमः । अविघ्नमस्तु ।

अदृश्यरूपाः कालस्य मूर्त्तयो भगणाश्रिताः ।
शीघ्रमन्दोच्चपाताख्या ग्रहाणां गतिहेतवः ॥

तत्पातरश्मिभिर्नद्धास्ते सव्येतरपाणिभिः ।
प्राक्पश्चादवकृष्यन्ते यथासन्नं स्वदिङ्मुखम् ॥

अथ स्फुटाध्यायो व्याख्यायते । तत्र धनर्णवासनामाह—अदृश्येत्यादिना, तत्पातरश्मिभिर्नद्धेत्यादिना च । स्वस्वज्योतिश्चक्राश्रितशीघ्रोच्चगतपाताख्यरश्मिभिः बद्धा ग्रहाः तैः शीघ्रोच्चादिभिः कर्तृभिः करणैस्त्वासन्नगातीभिरभिमुखमाकृष्यन्ते ।
प्रवहाख्यो मरुत् तांस्तु स्वोच्चाभिमुखमीरयेत् ।

End:

अयनचलनांशोत्पत्तिप्रकारमाह—

त्रिंशत्कृत्योयगे(?) भानां चक्रं प्राक् परिलम्बते ।
तद्गुणाद् भूदिनैर्भक्ताद् द्युगणाद्यदवाप्यते ॥

प्रवहवायुना नित्यं पश्चिमतो गच्छज्ज्योतिश्चक्रं तच्चक्रैस्थिरत्वाद् ग्रहाणां वक्रगतिवदेकस्मिंश्चतुर्युगे त्रिंशत्प्रकारं प्राङ्मुखम्... ...

Colophon:

Author:

Remarks—This commentary covers only a portion of Sphuṭādhikāra. The last few leaves deal with the science of omen.

॥ सूर्यसिद्धान्तः ॥

No. 729 H. SŪRYASIDDHĀNTA.

C. O. L. No. 2121 H.

Substance—Palm leaf. Size—14″ × 2″. Leaves—17. 12 lines per page and 48 letters per line. Script—Malayāḷam. No. of Granthas—650. Complete.

Owner—Same as No. 729 A.

Subject etc.—Same as No. 633 B.

Remarks—One Fol. at the end contains a panegyric of Pārthasārathi.

॥ महाभास्करीयम् ॥

No. 730 A. MAHĀBHĀSKARĪYAM.

C. O. L. No. 2371 A.

Substance—Palm leaf. Size—7¾″ × 1¾″. Leaves—41. 8 lines per page and 28 letters per line. Script—Malayāḷam. No. of Granthas—560. Complete.

Owner— Tuppan Tuppan Nambūri, Punnarkoṭṭu Manakal.

Subject etc.—Same as No. 902 DCSMMPL.

॥ तन्त्रसंग्रहः ॥

No. 730 B. TANTRASAṄGRAHA.

C. O. L. No. 2371 B.

Substance—Palm leaf. Size—$7\frac{1}{4}'' \times 1\frac{3}{4}''$. Leaves—50. 8 lines per page and 20 letters per line. Script—Malayāḷam. No. of Granthas — 500. Complete.

Owner—Same as No. 730 A.

Subject etc.—Same as No. 641 C.

Remarks—After the colophon the movements of planets, Jyā etc. are described in a few leaves. Then 24 authoritative statements occur. The last five leaves contain certain astrological computations.

॥ महाभास्करीयभाष्यम् ॥

No. 731 A. MAHĀBHĀSKARĪYABHĀṢYAM.

C. O. L. No. 1888 A.

Substance—Palm leaf. Size—$24'' \times 2''$. Leaves—51. 9 lines per page and 80 letters per line. Script—Malayāḷam. No. of Granthas—2250,

Owner—Nārāyaṇaru Govindaru.

Subject etc.—Same as No. 903. DCSMMPL.

Author—Govindasvāmin.

Remarks—The Ms. lacks a few leaves in its beginning.

॥ सूर्यसिद्धान्तः ॥

No. 731 B. SŪRYASIDDHĀNTA.

C. O. L. No. 1888 B

Substance—Palm leaf. Size—24″ × 2″. Leaves—20. 8 lines per page and 30 letters per line. Script—Malayāḷam. No. of Granthas—600. Complete.

Owner—Same as No. 731 A.

Subject etc.—Same as No. 633 B.

Author:

Remarks—The last 8 FF. contain a fragment of the Jyotiṣopaniṣad.

॥ महाभास्करीयव्याख्या (प्रयोगरचना) ॥

No. 732. MAHĀBHĀSKARĪYAVYĀKHYĀ. (Prayogaracanā.)

C. O. L. No. 176.

Substance—Paper. Size—14″ × 8½″. Pages—121.

20 lines per page and 18 letters per line. Script—Devanāgarī. No. of Granthas—1350.

Owner—C. O.

Subject etc.—Same as No. 729 B.

॥ मुहूर्तदर्शनम् ॥

No. 733 A. MUHŪRTADARŚANAM.

C. O. L. No. 1912 A.

Substance—Palm leaf. Size—10½″ × 1½″. Leaves—47. 10 lines per page and 36 letters per line. Script—Malayāḷam. No. of Granthas—1050.

Owner—Nārāyaṇan Uṇṇi Nīlakaṇṭhan Uṇṇi, Nārāyaṇamaṅgalam, Āranmuḷa.

Subject etc.—Same as No. 904, DCSMMPL.

॥ प्रश्नानुष्ठानपद्धतिः ॥

No. 733 B. PRAŚNĀNUṢṬHĀNAPADDHATI.

C. O. L. No. 1912 B.

Substance—Palm leaf. Size—10½″ × 1½″. Leaves—20. 10—11 lines per page and 36 letters per line. Script—Malayāḷam. No. of Granthas—500. Complete.

Owner—Same as No. 733 A.

Subject etc.—Same as No. 899, DCSMMPL.

Remarks—The Ms. is much damaged. The last three leaves deal with prognostication and kindred subjects.

॥ सन्तानदीपिका ॥

No. 733 C. SANTĀNADĪPIKA.

C. O. L. No. 1912 C.

Substance—Palm leaf. Size—$10\frac{1}{2}'' \times 1\frac{1}{2}''$. Leaves—4. 12 lines per page and 48 letters per line. Script—Malayāḷam. No. of Granthas — 150. Complete.

Owner—Same as No. 733 A.

Subject etc.—Same as No. 968, DCSMMPL.

Remarks—A few verses from a different astrological treatise are quoted immediately after the close of this work.

॥ उडुजातकोदयः ॥

No. 733 D. UḌUJĀTAKODAYA.

C. O. L. No. 1912 D.

Substance—Palm leaf. Size—$10\frac{1}{2}'' \times 1\frac{1}{2}''$. Leaves—5. 10—12 lines per page and 40 letters per line.

Script—Malayāḷam. No. of Granthas—125. Complete.

Owner—Same as No. 733 A

Subject etc.—Same as No. 690

॥ जातकोदयम् ॥

No. 733 E. JĀTAKODAYAM.

C. O. L. No. 1912 E.

Substance—Palm leaf. Size—10½"×1½". Leaves—10. 12 lines per page and 44 letters per line. Script—Malayāḷam. No. of Granthas — 330. Complete.

Owner—Same as No. 733 A.

Subject etc.—Same as No. 883. DCSMMPL.

Remarks—Daśāntardaśāphala, Aṣṭavarga &c. are dealt with at the close.

॥ सारावली ॥

No. 733 F. SĀRĀVALI.

C. O. L. No. 1912 F.

Substance—Palm leaf. Size—10½"×1½". Leaves—4. 13 lines per page and 48 letters per line

Script—Malayalam. No. of Granthas—150. Complete.

Owner—Same as No. 733 A.

Subject—An account of the movements of planets.

Beginning:

सूर्यादयः पदार्था जायन्ते येन विविधजन्तूनाम् ।
तस्मादधुना वक्ष्ये भावाध्यायं विशेषेण ॥

लग्नेऽर्केऽल्पकचः क्रियालसतमः क्रोधी प्रचण्डोन्नतो
मानी लोचनरूक्षकर्कशतनुः शूरोऽक्षमो निर्घृणः ।
स्फोटाक्षः शशिभे क्रिये सतिमिरः सिंहे निशान्धः पुमान्
दारिद्र्योपहतो विनष्टतनयो जातस्तुलायां भवेत् ॥

End:

अल्पायुः कुमुखी पराक्रमगुणी हृच्छूलनष्टात्मजः
स्थानभ्रंशकरो विशीर्णवदनो दुर्मार्गमृत्युस्तथा ।
धर्मादिप्रतिकूलताडनरुचिर्वीर्यान्वितो दोषवान्
....लग्नभवनात् केतोः फलं कीर्तयेत् ॥

Colophon:

Author:

Remarks—The Ms. contains the Bhāvādhyāya only.

॥ मुहूर्तदर्शनम् ॥

No. 734 A. MUHŪRTADARŚANAM.

C. O. L. No. 2219 A.

Substance—Palm leaf. Size—15¼″ × 1¾″. Leaves—

43. 8 lines per page and 44 letters per line. Script—Malayāḷam. No. of Granthas—950.

Owner—Subramoṇyan Saṅkaran Mūttatu, Kuḷangara Illom, Kiḍaṅgūr.

Subject etc.—Same as No. 904, DCSMMPL.

Author :

Remarks—The leaves are much damaged. The first 36 pages are devoted to the exposition of certain astrological topics like Sphuṭa, Jyā etc.

॥ ग्रहयोगफलनिरूपणम् ॥

No. 734 B. GRAHAYOGAPHALANIRŪPAṆAM.

C. O. L. No. 2219 B.

Substance—Palm leaf. Size—15¼″ × 1¾″. Leaves—10. 7—8 lines per page and 44 letters per line. Script—Malayāḷam. No. of Granthas — 200.

Owner—Same as No. 734 A.

Subject—Exposition of certain astronomical effects.

Beginning :

....ढात्मकोऽनिलात्मा
नातिसुतो बन्धुवर्गदुःखरतः ।
असहितवेश्मनिवासो
राहौ सुखगे नवातिदीर्घायुः ॥

पापग्रहैः सुखस्थैः सौख्यविहीनो भवेन्न सन्देहः ।
सौम्यग्रहैस्तु सौख्यं लभते ज्ञानं धनं चापि ॥

शत्रुक्षेत्रे पापैर्बन्धुगृहस्थैश्च बन्धुभिस्त्यक्तः ।
सौरश्चिरजीवी च स्वकुलाधिकयं च मौढ्यं च ॥

बुधभौमौ सुखमंस्थौ सुहृदां परिसंक्षयं समादेश्यम् ।
कुजमन्दौ हिबुकस्थौ क्रतुप्रियः स्यान्महाशूरः ॥

जीवसहायः शुक्रः सुखस्थितः पण्डितं नरं कुरुते ।
गुरुसहितो रविसूनुश्चाल्पापत्यं नरेन्द्रचरितं च ॥

End :

पुराणद्रव्यनाशी च चपलः सत्त्वहीनवान् ।
प्रमादिनां प्रियो नित्यं तुङ्गे व्ययगते फलम् ॥

भानौ क्षीणेन्दौ वा व्ययभवने भवति हरति वित्तम्+ ।
भौमे बुधसंदृष्टे स्वल्पफलं कीर्तितं यवनैः ॥

पापग्रहैर्व्ययस्थैर्विपुलोत्साहेन निर्दिशेद्वित्तम् ।
भावाध्यायेऽप्युक्तं शेषं यवनोदितेन शास्त्रेण ॥

एकैकं पूर्णफलं द्वित्रिचतुर्भिः समागतैश्चोरैः ।
भावफलैर्भवति यदा पूर्णनिशासङ्गमं तद्वत् ॥

पापा निघ्नन्ति मूर्त्यादीन् भावान् पुष्णन्ति शोभनाः ।
विपरीतरिपू रन्ध्रे व्ययगेषु फलं स्मृतम् ॥

योगाश्रयबलयोगात्सौम्यसुहृद्रिपुनिरीक्षणाद्वापि ।
उच्चादिभवनसंस्थैर्ग्रहैश्च फलमन्यथा भवति ॥

Colophon :

... ...

Author :

Remarks—The work has neither beginning nor end. It appears to be a portion of an original astrological treatise. The title is based on the subject-matter.

॥ प्रश्नानुष्ठानपद्धतिः ॥

No. 734 C. PRAŚNĀNUṢṬHĀNAPADDHATI.

C. O. L. No. 2219 C.

Substance—Palm leaf. Size—$15\frac{1}{4}'' \times 1\frac{3}{4}''$. Leaves—26. 8 lines per page and 48 letters per line. Script—Malayāḷam. No. of Granthas—600.

Owner—Same as No. 734 A.

Subject etc.—Same as No. 899, DCSMMPL.

॥ मुहूर्तदर्शनम् (केरलभाषाव्याख्योपेतम्) ॥

No. 735. MUHŪRTADARŚANAM with Malayāḷam commentary.

C. O. L. No. 2140.

Substance—Palm leaf. Size—$11\frac{3}{4}'' \times 1\frac{3}{4}''$ Leaves—145. 8—9 lines per page and 40 letters per line. Script—Malayāḷam. No. of Granthas—3100.

Subject—Kuñjan Tampurān. Ālaṅgāḍu Svarūpam. Aṅkamāli.

Subject—Prescription of *muhūrtas*

Beginning :

हरिः । श्रीगणपतये नमः । अविघ्नमस्तु ।

श्रियं श्रीगुरुपादाब्जपांसवः प्रदिशन्तु वः
भवन्ति भववाराशेर्ये सुखोत्तारहेतवः ॥

इति। മുഹൂർത്തദർശനമാകുന്ന പ്രകരണത്തെ ചമപ്പാൻ തുടങ്ങുന്ന ആചാൎയ്യൻ അതിന്റെ അവിഘ്നപരിസമാപ്തിയ്ക്കായിക്കൊണ്ടും പ്രചയഗമനത്തിനായ്ക്കൊണ്ടും സ്വേഷ്ടദേവതയായിരുന്ന ആദിത്യനെ നമസ്കാരം ചെയ്യുമാറാകുന്നു [illegible] എന്ന

जयत्यमेयांशुनिधिर्जगत्त्रयी-
प्रबोधहेतुस्सविता त्रयीमयः
न सर्वदर्शित्वमितो विना भवे-
दितीव यन्नेत्रमधत्त शङ्करः ॥

इति। सविता जयति। ഒട്ടൊഴിയാതെ ഉള്ള ലോകങ്ങളുടെ പ്രസൂതികാരണമായുള്ള ആദിത്യൻ എല്ലാത്തിന്റെയും മേലെ വൎത്തിക്കുന്നു. अमेयांशुनिधिः അസംഖ്യങ്ങളായുള്ള രശ്മികളുടെ ന്യാസസ്ഥാനമായിരിക്കുന്നു. ജഗത്ത്രയീപ്രബോധഹേതുഃ അങ്ങനെയുമായിരിക്കുന്നു. മൂന്നു ലോകങ്ങളുടെയും ചൈതന്യോന്മേഷത്തിന്നു കാരണമായിരിയ്ക്കുന്നു. त्रयीमयः ഋഗ്യജുസ്സാമസ്വരൂപനായുമിരിക്കുന്നു. शङ्करः यं नेत्रमधत्त ശിവൻ യാവനൊരുത്തനെ, തൃക്കണ്ണാക്കി इतः विना सर्वदर्शित्वं न भवेत् इति मत्वा इव ഇവനോടു വേർപെട്ടാൽ തന്റെ സൎവ്വദർശിത്വം അനൎത്ഥമായി ഭവിക്കയില്ല എന്നു കല്പിച്ചിട്ടോ

എന്നു തോന്നും. സൂൎയ്യനെ നേത്രമായി ധരിക്കകൊണ്ടത്രെ ശിവന്നു് സൎവ്വദൎശിത്വമുണ്ടായി എന്നു ഉൽപ്രേക്ഷിക്കപ്പെടുന്നു.

End:

एकांशकस्थौ शशिसैंहिकेयौ
लग्ने यदा सूर्यसुतेन दृष्टौ ।
तदैव धान्यस्य करोतु रक्षां
न मूषिकादेर्भवतीह भीतिः ॥

यदा शशिसैंहिकेयौ एकांशकस्थौ लग्ने सूर्यसुतेन दृष्टौ तदा एव धान्यस्य रक्षां करोतु ।

യാതൊരിക്കൽ ചന്ദ്രനും രാഹുവും ശനിദൃഷ്ടിയോടും കൂടി ഏകാംശകത്തിന്മേലെ നിന്നു ലഗ്നത്തിലുണ്ടാവുന്നു, അപ്പോൾ ധാന്യത്തിന്റെ രക്ഷയെ ചെയ്യൂ. ഇഹ മൂഷികാദേഃ ഭീതിർന്ന ഭവതി എന്നാൽ മൂഷികാദികളുടെ ഭയം ഉണ്ടാകയില്ല.

अप्ये वरुणर्क्षे वा कुजवारे लग्नसंस्थिते मन्दे ।
आदध्याद् वृतिवप्रप्राकारादीन् गृहस्य रक्षार्थम् ॥

अप्ये वरुणर्क्षे वा कुजवारे मन्दे लग्नसंस्थिते गृहस्य रक्षार्थं वृतिवप्रप्राकारादीन् आदध्याद् ।

പൂരാടം താൻ ചതയം താൻ കുജവാരത്തോടു കൂടുമ്പോഴെ മന്ദോദയം കൊണ്ടു വേലി അകിഴ മതിൽ എന്നിവ ഉണ്ടാക്കിക്കൊൾക.

Colophon:

इति पद्यै(रनवद्यै)रिह त्रयस्त्रिंशता कृतो दशमः ।
कृषिबीजनिपातादिक्रियाक्रमाध्याय एष संपूर्णः ॥
गुरवे नमः ।

Author—Text: Vidyāmādhava.

Remarks—Some leaves are damaged. Leaves 1—109 are in order, but a fresh numbering is given subsequently.

॥ मुहूर्तदर्शनम् (केरलभाषाव्याख्योपेतम्) ॥

No. 736. MUHŪRTADARŚANAM
with Malayāḷam commentary.

C. O. L. No. 2138.

Substance—Palm leaf. Size—$9\frac{3}{4}'' \times 1\frac{3}{4}''$. Leaves—183. 8 lines per page and 28 letters per line. Script—Malayāḷam. No. of Granthas—2562.

Owner—Nārāyaṇan Bhaṭṭatiripād, Mūttamanakkal, Vanam-codu-kara, Parur.

Subject—Beginning: Same as No. 735.

End:

इत्थं समस्तजगतामशुभं शुभञ्च
सञ्जायते हि निखिलं ग्रहचारशक्त्या ।
पूजास्तुतिप्रणतिभिर्मुदिता ग्रहास्ते
कुर्वन्त्यनिष्टगतयोऽपि जनस्य लक्ष्मीम् ॥

ഇങ്ങനെ എല്ലാൎക്കും അശുഭവും ശുഭവും ഒക്കവെ ഗ്രഹചാരത്തിന്റെ ശക്തികൊണ്ടു് ഉണ്ടാകുന്നതാകിലും പൂജാസ്തുതിപ്രണാമങ്ങളെക്കൊണ്ടു് പ്രസാദിച്ചിരിക്കുന്ന ഗ്രഹങ്ങൾ ജനത്തിന്നു ലക്ഷ്മിയെ ഉണ്ടാക്കും.

Colophon

इति विद्यामाधवीयाभिधानं नाम मुहूर्तदर्शनं समाप्तम् ।

Author—Text Vidyāmādhava

Remarks—Only 183 leaves out of 193 are extant herein. The leaves between the 160th Fol and the 194th are missing. The following two verses occur immediately after the colophon :

'श्रेष्ठो जीयाद् भटो नित्यं तज्ज्ञः प्राज्ञस्तरः क्रमात् ।
यामशुक्रस्य घटिका वेद्या सर्वस्य वत्सरात् ॥

॥ मुहूर्तदर्शनम् (केरलभाषाव्याख्योपेतम्) ॥

No. 737 A. MUHŪRTADARSANAM
with Malayāḷam commentary.

C. O. L. No. 2515 A.

Substance—Palm leaf. Size—$15\frac{1}{2}'' \times 1\frac{3}{4}''$. Leaves—114. 8—12 lines per page and 60 letters per line. Script — Grantha. No. of Granthas—Incomplete.

Owner—Kāśi Vādhyār, Mahādānapuram

Subject—Beginning Same as No. 735.

End :

पापा विक्रमगाः शुभास्तनुगताश्चन्द्रोऽनष्टगः शुभः ।

പാപഗ്രഹങ്ങൾ മൂന്നാമിടത്ത് നില്പൂ. ശുഭഗ്രഹങ്ങൾ ലഗ്നത്തിൽ നില്പൂ. ചന്ദ്രൻ അഷ്ടമമല്ലാതെ നില്പൂ. ഇങ്ങനെ ഒരുയോഗം.

चन्द्रे अनष्टमगे तनौ सुरगुरौ क्रूरे व्योम्नि भवे ।

ചന്ദ്രൻ ... ...നില്പൂ. ഇങ്ങനെ ഒരുയോഗം സുരഗുരു ലഗ്നത്തിങ്കൽ നില്പൂ, പത്താമടത്തേതാൻ പതിനൊന്നാമടത്തേതാൻ ക്രൂരഗ്രഹമുണ്ടാവൂ. ഇങ്ങനെ ഒരു യോഗം.

शुभाः लग्नैकादशवित्तगाः यदि

ലഗ്നത്തിലും പതിനൊന്നാമടത്തും രണ്ടാമടത്തും ശുഭഗ്രഹങ്ങളുണ്ടാവൂ.

पापौ त्रिगौ खे रविः ।

മൂന്നാമിടത്തെ കുജമന്ദന്മാരും നില്പൂ. ഇങ്ങനെ ഒരു യോഗം.

Colophon :

Remarks—The last two leaves are detailed for the explication of certain astrological topics.

॥ रोहिणीनक्षत्रशान्तिः ॥

No. 737 B. ROHIṆĪNAKṢATRAŚĀNTI.

C. O. L. No. 2515 B.

Substance—Palm-leaf. Size—$15\frac{1}{2}'' \times 1\frac{1}{2}''$. Leaves—2.

7 lines per page and 40 letters per line. Script—Grantha. No. of Granthas—35.

Owner—Same as No. 737 A.

Subject—Worship of Rohini.

Beginning :

अथातः सम्प्रवक्ष्यामि रोहिण्यां जनितस्य तु ।
पित्रोर्बन्धनपीडा स्यात् षण्मा(सा)न्मातुलस्य च ॥

मृत्युर्भवेत्तथा रोगः पीडा भवति सर्वदा ।
तस्मात्तद्दोषशान्त्यर्थं शान्तिं कुर्याद्यथाविधि ॥

द्वादशे षोडशे वापि दिवसे न्य.... ....पि त्रा ।
चन्द्रतारे बलयुते शान्तिं कुर्याद्विचक्षणः ॥

गोमयेनोपलिप्योर्वीं रङ्गवल्लीं प्रकल्पयेत् ।
व्रीहीन् द्रोणप्रमाणेन तत्तत्क्षिप्त्वा तदर्धतः ॥

End :

ततो गावमलङ्कृत्य आचार्याय प्रदापयेत् ।
ऋत्विग्भ्यो दक्षिणां दद्यादाचार्याय विशेषतः ॥

इति कृत्वा विधानेन आचार्यं प्रणिपत्य च ।
नामकर्म ततः पश्चात् सम्पूज्य कुलदेवताः ॥

ब्राह्मणान् भोजयेत् पश्चाद्यथावित्तानुसारतः ।
अनेन विधिना शान्तिं कुर्याद्धीमान् विचक्षणः ॥

आयुरारोग्यवृद्धिं च तुष्टिं पुष्टिं च विन्दति ।

सर्वशान्तिकरं पुण्यं सौख्यश्चैव प्रजायते ॥

मातुलस्य विशेषेण सर्वदोषः प्रशाम्यति ।

Colophon :

इति रोहिणीनक्षत्रशान्तिः समाप्ता ।

Author :

Remarks—Immediately after the close of the work occur the description Rama's coronation and a few invocatory verses relating to Hanumān.

॥ मुहूर्तदर्शनम् (केरलभाषाव्याख्योपेतम्) ॥

No. 733. MUHŪRTADARŚANAM with Malayāḷam commentary.

Substance—Palm leaf. Size—10″ x 1¾″. Leaves—182. 9 lines per page and 36 letters per line. Script—Malayāḷam. No. of Granthas—3700.

Subject etc.—Same as No. 735.

Remarks—The colophon discloses that the author was a Keraḷa Brahmin belonging to the Vāsiṣṭha Gotra in the village of Guṇavati.

॥ मुहूर्तदर्शनम् (केरलभाषाव्याख्योपेतम्) ॥

No. 739. MUHŪRTADARSANAM with Malayāḷam commentary.

C. O. L. No. 277.

Substance—Paper. Size—11″ × 8½″. Pages—468. 18 lines per page and 16 letters per line. Script—Malayāḷam. No. of Granthas—4200. Incomplete.

Owner—C. O.

Subject—Beginning: Same as No. 735.

End:

പത്താമടത്തുതാൻ പതിനൊന്നാമടത്തുതാൻ ക്രൂരഗ്രഹ
മുണ്ടാവൂ. ഇങ്ങനെ ഒരു യോഗം. ശുഭാഃ ലഗ്നൈകാദശവിത്ത
ഗാഃ യദി ലഗ്നത്തിലും പതിനൊന്നാമടത്തും രണ്ടാമടത്തും
ശുഭഗ്രഹങ്ങളുണ്ടാവൂ. പാപൌ ത്രിഗൌ ച രവിഃ മൂന്നാമടത്തു
കുജമന്ദന്മാരും പ. . . . .

Colophon:

इति पद्यैरनवद्यैरिह त्रयस्त्रिंशता कृतो दशमः ।
कृषिबीजनिपातादिक्रियाक्रमाध्याय एष संपूर्णः ॥

Author:

Remarks—Same as No. 607 A.

॥ मुहूर्तदर्शनम् (केरलभाषाव्याख्योपेतम्) ॥

No. 740. MUHŪRTADARŚANAM
with Malayāḷam commentary.

C. O. L. No. 564.

Substance—Palm leaf. Size—11″ × 1½″. Leaves—234. 9 lines per page and 36 letters per line. Script—Malayāḷam. No. of Granthas—4700.

Owner—Nārāyaṇan Nīlakaṇṭhan Uṇṇi, Āranmuḷa.

Subject etc.—Same as No. 735.

Remarks—After colophon occurs the following portion disclosing the date of transcription :

൯൭൨-ാമാണ്ടു മിഥുനമാസം ൨൮-ാം൹ എഴുതിതീൎത്ത പുസ്തകം. വയലാററെ മാതവൻ കൈഎഴുത്തു

॥ मुहूर्तदर्शनम् (सव्याख्यम्) ॥

No. 741. MUHŪRTADARŚANAM
with commentary.

C. O. L. No. 337.

Substance—Palm leaf. Size—11″ × 1½″. Leaves—220. 12 lines per page and 42 letters per line. Script—Malayāḷam. No. of Granthas—7000.

Owner—Parameśvaran Nambūri, Eḍappaḷḷi Manakkal, Alwaye.

Subject—Same as No. 735.

Beginning :

हरिः श्रीगणपतये नमः । अविघ्नमस्तु ।

स्वस्ति श्रीगुरुपादाब्जपांसवः प्रदिशन्तु वः ।
भवन्ति भववाराशेर्ये सुखोत्तारहेतवः ॥

नमः शिवापरीरम्भसंरम्भोद्भ्रान्तचेतसे ।
शर्वाय शार्वरीसार्वभौममण्डितमौलये ॥

भूत्यै भूयान्महत्यै निजनतजनतातङ्कसङ्कोचकारी
कस्तूरीपङ्कशङ्काङ्कितकिरणामिळत्कालिमालीढकण्ठः ।
भास्वत्कालानलोष्मप्रशमनमनसा मूर्ध्नि येनार्धचन्द्रः
प्राबन्धि स्वर्गसिन्धुप्रकटपरिलसत्सैकताङ्कानुकारी ॥

द्वैमातुरत्वमिव यस्य निजां प्रसिद्धिं
नेतुं तनौ मनुजता गजतोत्तमाङ्गे ।
भाति स्फुटं विघटिताखिलविघ्नसङ्घो
विघ्नाधिपः प्रदिशतादनिशं श्रियं वः ॥

अम्भोजसम्भवमुखाम्बुजमुग्धभृङ्गी
शृङ्गारधामसितधामविभासिचूडा ।
पञ्चाशदर्णपरिचार्चितदिव्यदेहा
वाग्देवता वसतु नो रसनाग्ररङ्गे ॥

यद्वृत्त्या समयोऽप्यनादिनिधनो नाना परिच्छिद्यते
पुंसामद्भुतभूरनक्षविषयो बोधश्च सम्पद्यते ।
नृणां कर्मफलानुभावनविधिर्विष्टभ्य संसाद्यते
ते देयासुरमी चिराय खचराः श्रेयांसि भूयांसि वः ॥

वसिष्ठवागीश्वरगार्ग्यमुख्यान्
महामुनीन् नौमि महानुभावान् ।
यदाज्ञया खेऽटति खेटपाळी
भोक्ता च लोकः सदसत्फलानाम् ॥

वन्दे विद्यामाधवं देशिकेन्द्रं
लक्ष्म्यावासं संश्रयं षड्गुणानाम् ।
यद्वक्त्राब्जावासमैच्छत्सपत्नी
सेवादैन्यं हातुकामेव वाणी ॥

तदङ्घ्रिसेवासमवाप्तविद्यो
विभाति नारायणपूज्यपादः ।
विजहतुर्यत्र विमुक्तवैरे
चिराय वाणीकमले समेते ॥

श्रीमन्मल्लप्पभूपः स जयति जगतीभूषणो भूरिधामा
पारावारावगाढक्षितिधरशिखरप्रस्फुरत्कीर्तिपूरः ।
किं ब्रूमोऽस्य प्रतापं सुरपतिचकिताद्रीन्द्ररक्षातिदक्षः
श्रीभर्तुर्वासभूमिर्वितरति जलधिर्यस्य रत्नानि नित्यम् ॥

यः क्षात्त्रीमनुषङ्गिणीमनुपमां ब्राह्मीमजिह्मां निजां
लक्ष्मीं साधु बिभर्ति संश्रितजगत्सङ्कल्पकल्पद्रुमः ।
वैरिव्रातवधव्रती तदयशःपङ्काङ्कभूपाळिका-
मातन्वन् वसुधां स्वकीर्त्तिविशदालेपोज्ज्वलां सोज्ज्वलाम् ॥

वीरश्रीधरबुक्कभूपतिमहासाम्राज्यलक्ष्मीकरा-
लम्बा दारचरित्रविक्रमरसस्त्रैयम्बकालम्बनः ।
नीत्या निर्जितदैत्यनिर्जरगुरुः प्रोद्दण्डदण्डद्विष-
न्मुण्डोत्खण्डनचण्डपण्डितकरः क्ष्मामण्डलाखण्डलः ॥

शिवागमाचारविशुद्धपुण्यः
सदात्मविद्यापरिरब्धबुद्धिः ।
समस्तविद्वत्कुलसंश्रयोऽयं
नृपः क्षितिं रक्षति रामसूष्टाम् ॥

तदा तदास्थानगतोऽस्ति विश्रुतः
सुधीः सुधीरो धरणीसुराग्रणीः ।
गुणानुरागी गुणवत्य(?)धीश्वर-
प्रसादसम्पादितसम्पदुद्भवः ॥

पुरातनाचर्यसमीरितागमान्
विचार्य तद्वाक्यशतैः समर्थयन् ।
उदीरितं वानुदितं समर्पय-
न्निमां विधत्ते सुमुहूर्तदीपिकाम् ॥

ज्योतिःशास्त्रमहार्णवं मतिमथा निर्मथ्य यन्निर्मलं
विद्यामाधवसूरिणा समुदितं सद्वृत्तरत्नोज्ज्वलम् ।
स्वालोकाय मुहुर्मुहूर्तमुकुरं होराविलासश्रियं
श्रेयो दीपयितुं यतेऽद्य तदहं वाग्भूतिभिर्भूतिभिः ॥

तत्रादौ तावदाचार्यः प्रारिप्सितस्य प्रकरणस्यानन्तरायेण परि-समाप्तये लोके प्रसरणाय च स्वेष्टदेवतानमस्कारानुस्मरणपूर्वकं जय-तिपदेन मङ्गलाचरणमादधानः सकलज्योतिःशास्त्राभिधेयाधिकर-णभूतग्रहाधिपतिं सूर्यमभिष्टौति—जयत्यमेयांशुनिधिरिति ।

End:

तथा च ज्योतिषार्णवे—

"देवालयगजाश्वानां वृक्षाणां वापि कूपयोः ।
सर्वोपकरणानां तु चिह्नानां योषितां नृणाम् ॥

काव्यानां च कवीनां च पश्चादीनां विशेषतः ।
राजप्रसादलब्धानां नामकर्मवदिष्यते" ॥

इति ।

वाद्यादिमेळने चैव तथा देवादिदर्शने ।
शिशोर्गीतादि नाव्यर्तुवस्त्रधारणवद्वदेत् ॥

इति । अध्यायमुपसंहरति—देवप्रतिष्ठापनेति ।

Colophon:

मुहूर्तदर्शनादर्शव्याख्याने विष्णुना कृते ।
व्याचष्टैकादशाध्यायं विद्यामाधवनन्दनः ॥

Author—Text: Vidyāmādhava.
Com: Viṣṇu.

Remarks—Only 11 chapters are elucidated in this Ms. The introductory verses are of immense use to research scholars since they shed considerable light on the history of Vijayanagar. A few leaves of another work on astrology are also appended to the close. This work is printed in Mysore.

॥ मुहूर्तदर्शनम् (सव्याख्यम्) ॥

No. 742. MUHŪRTADARŚANAM
with commentary.

C. O. L. No. 139.

Substance—Palm leaf. Size—$20\frac{1}{4}'' \times 2''$. Leaves—196. 9—11 lines per page and 88 letters per line. Script—Malayāḷam. No. of Granthas—10780. Incomplete.

Owner—Kṛṣṇan Keśavan, Perinad.

Subject—Beginning: Same as No. 735.

End:

दुष्टवाक्यपिशुनाङ्गद... ...
बन्धनैः सकलभैश्च मृतस्य ।
जन्मगे शशिसुते पथि गच्छन्
स्वागतेऽपि कुशलं न शृणोति ॥

Colophon:

परभवनगते धनलब्धिः... ... ..
तारादिलक्षणाध्यायः श्लोकैर्दशभिराहितः ।
समाप्तोऽयमभूद् विद्यामाधवीये चतुर्दशः ॥
मुहूर्तदर्शनादर्शव्याख्याने विष्णुना कृते ।
व्याख्यातो निर्गतोऽध्यायश्चतुर्दश मनोहरः ।

Author—Same as No. 735.

Remarks—The Ms. contains only fourteen chapters and 11 stanzas in the 15th. The commentator and the ruling sovereign at the time are vividly described at the beginning.

॥ मुहूर्तदर्शनम् (सव्याख्यम्) ॥

No. 743. MUHŪRTADARŚANAM

with commentary.

C. O. L. No. 2200.

Substance—Palm leaf. Size—19″ × 2″. Leaves—137. 9—11 lines per page and 56 letters per line.

Script—Malayālam. No. of Granthas—4900. Incomplete.

Owner—Kuñjan Namburipād Avl., Citūr Manakkal, Cerpu.

Subject—Same as No. 735.

Beginning:

.. ...स्तमेति स सर्वेषां भूतानां प्राणानादायास्तमेती"ति।
त्रयीमयः (वेद?)वेदत्रयमयः ऋग्यजुस्सामभिः कल्पितमण्डलाद्यात्मा।

तथा च सूर्यसिद्धान्ते—

"ऋचोऽस्य मण्डलं सामान्यस्य मूर्तिर्यजूंषि च।
त्रयीमयोऽयं भगवान् कालात्मा कालकृद् विभुः॥"

इति। तथा च श्रूयते—

"ऋग्भ्यो जातां सर्वशो मूर्त्तिमाहुः
सर्वा गीतिर्याजुषी हैव शश्वत्।
सर्वं तेजः सामरूप्यं हि शश्वत्
सर्वं भेदं ब्रह्मणा हैव सृष्टम्॥"

इति शिवस्यापि सर्वज्ञत्वमेतन्निबन्धनमित्याह—इतः सवितुर्विना स्वकीयं सर्वदर्शित्वं सर्वज्ञत्वमन्वर्थं भवेदिति मत्वेव स्वनाम्नोऽन्वर्थतापादनाय शङ्करः शिवः यं सूर्यं नेत्रभूतं धृतवान्। शिवस्य दक्षिणनेत्रं सूर्य इति हि प्रसिद्धिः। शिवस्य सर्वज्ञत्वं सूर्यनेत्रधारणादन्वर्थमासीदित्युत्प्रेक्ष्यम्।

End:

तत्कालेन्दुनवांशाज्जामित्रे शीतगौ स्थिते प्रसवः।
उदयनवांशाधिपतेः क्षेत्रे तस्मिन् यदा प्रसवः॥

यावानुदेति दिनरात्रिसमानभाग-
स्तावद्गते दिननिशोः प्रवदन्ति जन्म ।

इति । एवं गर्भाधानकालमुक्त्वा---
गर्भाधानमृतौ पुंसवनं स्पन्दनाद् पुरा ।"
इति स्मृत्युक्तस्य पुंसवनाख्यगर्भसंस्कारस्य कालमाह----
कुर्यात् पुंसवनं रमारमणभे पुष्येऽपि वा मद्ग्रहे ।
लग्नस्थे निधने ग्रहेण रहिते मासे तृतीये बुधः ॥

Colophon :

इति षोडशभिस्त्रिसङ्गुणै रुचिरैः श्लोकवरैर्विगुम्फितः ।
कृतसर्वबलाबलस्थितिः कथितोऽध्याय इहैष पञ्चमः ॥
इति श्रीदर्पणव्याख्यायां कोचाळियगोविन्दभट्टग्रन्थे
कळिकट्टियशङ्करभट्टरबरहे पञ्चमोऽध्यायः ।
इति मुहूर्तदर्शनव्याख्याने मुहूर्तदीपिकायां पञ्चमोऽध्यायः ।
इत्थं विद्यामाधवीये मुहूर्ता
दर्शे विद्यामाधवस्यात्मजेन ।
व्याख्यातोऽभूद् गुम्भिते विष्णुनाम्ना
वीर्यावीर्यं दर्शयन् पञ्चमोऽयम् ॥

Author—Text : Vidyāmādhava.
Com : Viṣṇu Śarma.

Remarks—The Ms. contains the first five chapters and a fragment of the 6th. The colophon indicates that it has been transcribed by Śaṅkara Bhaṭṭa.

(To be continued.)